# सन्ध्याप्रयोगः

अथ सन्ध्याप्रयोगः(१) ।
यथोक्तस्नानानन्तरं श्वेतं अस्यूतारजकधौतं वस्त्रं(२) परिधाय उपवस्त्रं(३) गृहीत्वा कुशादिविहितासने(४) प्राङ्मुख(५) उपविश्य पवित्रपाणिः(६) पुण्यदेशे(७) सन्ध्योपासनमारभेत, तत्रादौ यज्ञीयभस्म तीर्थमृदो वा गृहीत्वा जलमिश्रणानन्तरं "ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्" (इति मर्दयित्वा) "ॐ नमः शिवाय" इत्यभिमन्त्र्य तिलकं(८) कुर्यात्तत्र मन्त्रः - ॐ त्र्यायुषं जमदग्नेः इति ललाटे, ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायाम्, ॐ यद्देवेषु त्र्यायुषं इति बाहुमूले, ॐ तन्नोऽअस्तु त्र्यायुषं इति हृदये ।
विष्णुस्मरणम् -
अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः मुखे विष्णुर्देवता गायत्रीछन्दः पवित्रकरणे विनियोगः ॥

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

(अनेन मन्त्रेण विष्णुं स्मृत्वा किञ्चिज्जलं शिरसि सिञ्चेत्) ॥
आचमनम्(९) - ॐ ऋग्वेदाय स्वाहा, ॐ यजुर्वेदाय स्वाहा, ॐ सामवेदाय स्वाहा (इति त्रिभिर्मन्त्रैः ब्रह्मतीर्थेन जलं त्रिराचम्य) ॐ अथर्ववेदाय नमः (इति करौ प्रक्षाल्य दक्षिणकर्णं स्पृशेत्) ॥

शिखाबन्धनम्(१०) - प्रणवव्याहृतिगायत्र्या ॐ ब्रह्मवाक्यसहस्रेण शिववाक्यशतेन च । विष्णोर्नामसहस्रेण शिखाग्रन्थिं करोम्यहम् ॥ (इत्यनेन वा बध्नीयात्, बद्धायां केवलं संस्पृशेदेव ॥)
खस्पर्शः(११) - ॐ विष्णुर्विष्णुर्विष्णुः (इति पठित्वा) ॐ वाग्वाक् (१२) ॐ प्राणः प्राणः(१३) ॐ चक्षुश्चक्षुः ॐ श्रोत्रं श्रोत्रं ॐ नाभिः ॐ हृदयं ॐ कण्ठः ॐ ललाटं ॐ शिरः ॐ शिखा ॐ बाहुभ्यां(१४) यशोबलम्(१५) ।
(इतीन्द्रियाद्यायतनानि जलार्द्रदक्षिणकरस्य मध्यमानामिकाभ्यां संस्पृशेत्) ॥

(८)- ललाटे तिलकं कृत्वा सन्ध्याकर्म समाचरेत् । अकृत्वा भालतिलकं तस्य कर्म निरर्थकम् । (प्र. पा.) । अन्यच्च – श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुण्ड्रः पूतात्मा मृत्युञ्जयति मानवः । (कात्या.) । तिलकन्तु यज्ञीयभस्मना मुख्यं चन्दनेन तीर्थमृत्तिकया वा यथाकुलाचारं ललाटादौ कार्यम् । भस्मादीनामभावे जलेनैव धार्यमिति शिष्टाः - “मृद्भस्मं चन्दनं प्रोक्तं तोयं चैव चतुर्थकम् ।” (प्र. पा.) ।

(त्र्यायुषं जमदग्नेस्तु ललाटे ॐ नमो नमः ।
कश्यपस्य त्र्यायुषं च ग्रीवायां ॐ नमो नमः ॥ ६४॥

यद्देवेषु त्र्यायुषं च बाहुमूले नमो नमः ।
तन्नोऽस्तु त्र्यायुषमिति हृदि कृष्णाय ते नमः ॥ ६५॥

– लक्ष्मीनारायणसंहिता/खण्डः २ (त्रेतायुगसन्तानः)/अध्यायः १५९
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् ॥ ७॥

अथर्ववेदः/काण्डं ५/सूक्तम् २८
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम्॥

-यजुर्वेद ३.६२)

(९)- क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः । भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः । (म. नि. तं.) हृत्कण्ठतालुनाभिस्तु शुद्ध्येरन् स्त्री च यथासङ्ख्यं द्विजातयः । शूद्रश्च सकृत्स्पृष्टाभिरन्ततः । (याज्ञवल्क्यः) ।

(१०)- सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् । (का. स्मृ.) स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने । शिखाग्रन्थिं विना कर्म न कुर्याद्वै कदाचन (आह्नि. का.) । खल्वाटादिदोषेण विशिखश्चेन्नरो भवेत् । कौशीं तदा धारयीत ब्रह्मग्रन्थियुतां शिखाम् ।

(११)- त्रिःप्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् (याज्ञ.) । अन्यच्च - अद्भिश्च संस्पृशेत्खानि सर्वाण्यपि विशुद्धये । (वृ. पा. सं.) ॥

(१२)- इत्यनेन ओष्ठे स्पर्शः ।

(१३)- इत्यनेन नासारन्ध्रयोः स्पर्शः । चक्षुरित्यादि स्पृष्टमेव । विशेषः - प्राणश्चक्षुः श्रोत्रं इत्यत्र प्रथमं दक्षिणस्पर्शः ततो वामस्पर्श इति विवेकः ॥

(१४)- वामबाहुं दक्षिणस्कन्धे धृत्वा तदुपरि दक्षिणबाहुं वामस्कन्धे धारयेत् ।

(१५)- नमस्कारमुद्रा कार्या ।

